Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 6 | ISSN : 2581- 6306

# अद्वैतवेदान्तशास्त्रोक्तरीत्या आत्मनः सर्वविशेषप्रत्यस्तमितस्वरुपत्वप्रतिपादनम्, तत्र योगायुर्वेदशास्त्रयोः विचारप्रतिपादनं च



प्रज्वलः जे,
शोधच्छात्रः,
श्रिङ्गेरी परिसरः,
केन्द्रीयविश्वविद्यालयः, न्यूदेल्ली,भारत।

**Article Info**
Volume 3, Issue 6
Page Number: 31-43
Publication Issue :
November-December-2020

**Article History**
Accepted : 01 Dec 2020
Published : 10 Dec 2020

**ABSTRACT**

सारांश - जीवस्य स्वरूपज्ञानार्थं प्रवृत्तं वेदान्तशास्त्रं सामन्यं मानवं संसारचक्रात् पारयितुं समर्थम्। एवमेव सम्प्रति लोके अत्यन्तं प्रसिद्धे योगायुर्वेदशास्त्रे शरीरस्य अन्तःकरणस्य च स्वस्थतासम्पादनद्वारा जीवं कैवल्यमार्गे नयतः। एवं च एषां त्रयाणामपि शास्त्राणां लक्ष्यं परमपद-अवाप्तिरेव इति गम्यते। तस्मात् त्रयाणामपि शास्त्राणां समन्वयपूर्वकमध्ययनेन जीवस्य स्वरूपज्ञानार्थं प्रयत्नः सुकरः भवति। वेदान्तशास्त्रे प्राधान्येन चिन्तितः आत्मस्वरूपविचारः अस्मिन् शोधप्रबन्धे प्रधानविषयत्वेन स्वीकृतः। तेन सह आत्मस्वरूपविषये योगायुर्वेदशास्त्रयोः दृष्टिः कः? इत्यपि अस्मिन् प्रबन्धे चिन्त्यते। किञ्च आत्मस्वरूपविषये त्रयाणामपि शास्त्राणां साम्यता मतभेदाश्च अत्र विमृश्यन्ते। अस्य शोधप्रबन्धस्य अध्ययनेन आत्मनः स्वरूपविषये त्रयाणामपि शास्त्राणां वादाः, एकमत्यं विरोधाश्च ज्ञाताः भवन्ति। अपि च श्रुति-युक्ति-अनुभवैः कस्य मतस्य प्रामाण्यं स्वीकर्तुं शक्यमित्यपि प्रबन्धेन अनेन ज्ञातुं शक्यते। एवं शोधप्रबन्धमिदं लोकोपयोगाय भवतु इति इत्याशासे।

मुख्य शब्द – वेदान्तः, योगः, अयुर्वेदः, आत्मा, जीवः, ब्रह्म, अविद्या, मिथ्या, लक्षणम्, स्वरूपम्, सत्यम्, ज्ञानम्, अनन्तम्, आनन्दः, अध्यासः, प्रातिभासिकम्, पारमार्थिकम्, व्यावहारिकम्, निर्विकारी, नेऽति नेऽति, पुरुषः, प्रधानम्, संसारः, क्लेशः, बन्धः, कैवल्यम्, मोक्षः

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

संसारे जीवतां सर्वेषामपि जन्तूनां अहमाकारकः अनुभवः भवत्येव। अहमिति व्यवहारेण सर्वेऽपि जन्तवः आत्मानं व्यवहरन्ति। किञ्च अहमाकारकव्यवहारेण अत्मा चेतनः उच्यते इत्यपि सर्वेषामनुभवः। किन्तु प्रश्नः भवति अहमिति यः आत्मा व्यवह्रियते सः कः? किं सः शरीरावच्छिन्नः? किं इन्द्रियावच्छिन्नः? किं प्राणावच्छिन्नः? उत अन्तःकरणावच्छिन्नः? सः किं संसारधर्मसहितः? तद्विलक्षणः कश्चन? किं जागृत्स्वप्नसुषुप्ताख्याः अवस्थाः अत्मनः सन्ति उत सः तदतिरिक्तः कश्चन? इत्येवं नाना प्रश्नाः आत्मनः स्वरुपविषये सम्भवन्ति। एषां प्रश्नानाम् उत्तरं प्राप्तुम् आत्मस्वरूपस्य चिन्तनम् अनिवार्यम्। तस्मात् आत्मस्वरूपचिन्तनं सर्वैः दार्शनिकैः कृतम्। तत्र उपनिषदां चिन्तनं, योगायुर्वेदयोः तत्र प्रतिपत्तिः विप्रतिपत्तिश्च अत्र चिन्त्यते।

विभज्यवचनीयम्

जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, विनश्यति, कर्ता, भोक्ता, सुखी, दुःखी, पुण्यवान्, पापी इत्येवम् अनन्तविकारैः विकृतः आत्मा इति जीविनाम् अनुभवः। किन्तु उपनिषदः एतद्व्यतिरेकेण आत्मनः स्वरूपं वर्णयन्ति। आत्मनः स्वरूपं किम् इति प्रश्नस्य उत्तरं न एकान्तवचनीयं किन्तु विभज्यवचनीयम्। अर्थात् एकेन वाक्येन अस्य प्रश्नस्य उत्तरं दातुं न शकयते, किन्तु तत्र विभागः करणीयः भवति। सः च विभागः जीवात्म-परमात्मरूपः। यः संसारधर्मैः सामान्यानामनुभवसिद्धः अन्तःकरणावच्छिन्नं चैतन्यं[1] सः जीवात्मा। यः उपनिषत्सु प्रतिपादितः ज्ञानिनामनुभवमात्रगम्यः नित्यबुद्धमुक्तस्वभावः शुद्धं चैतन्यमात्रं सः परमात्मा। उक्तं च – "तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यः अभिचाकशीति"[2] इति। किन्तु अयं विभागः न वास्तवः। यतः आत्मनः एव जीवरूपेण शरीरप्रवेशः श्रुतिषु श्रूयते। उक्तं च - "सैव देवता ऐक्षत हन्त अहमिमास्तिस्रः देवताः अनेनैव जीवेन आत्मना अनुप्रविश्य"[3] इति। निश्चयेन अयं यः अनुप्रवेशः प्रतिपादितः सः न घटे जलप्रवेशवत् भवितुमर्हति। किन्तु जीवात्मा परमात्मनः अभिन्नः अथवा यः जीवात्मा अस्माकम् अनुभवे वर्तते सः वास्तवेण परमात्मा इति भावमेव अनुप्रवेशश्रुतिः प्रतिपादयति। गीतायामपि –"ममैवांशो जीवलोके जीवभूतः सनातनः"[4] इति भगवतः वचनम्। आचार्याश्च "जीवो हि नाम देवतायाः आभासमात्रम्। बुध्यादिभूतमात्रासंसर्गजनितः आदर्शः इव प्रविष्टः पुरुष प्रतिबिम्बः जलादिष्विव च सूर्यादीनाम्"[5], "आत्मा हि ब्रह्म", "स्वयं च आत्मा ब्रह्म"[6] इति जीवात्मनः स्वरूपं परमात्मा एव इति प्रतिपादयन्ति।

---

1 वे.परि-प्रत्यक्षपरिच्छेदः

2 मुं.उ २/१

3 छां.उ ६/३/२

4 भ.गी १५/ ७

5 छां.भा उ ६/३/२

6 तै.भा- शीक्षावल्ली सम्बन्धभाष्यम्

अपि च तत्वमस्यादिवाक्यैः जिवब्रह्मणोः ऐक्यम् उपनिषदः स्पष्टं ख्यापयन्ति। छान्दोग्ये उद्दालको आरुणिः स्वपुत्रं श्वेतकेतुम् उद्दिश्य "ऐतदाम्यमिदं सर्वं तत्सत्यं स आत्मा तत्वमसि"[7] इति नवकृत्वः उपदेशं चकार। "येनाश्रुतं श्रुतं भवति"[8] इति एकविज्ञानेन सर्वविज्ञानं प्रकृत्य "वाचारम्भणं विकारः मृत्तिकेत्येव सत्यम्"[9] इति उदाहरणपूर्वकं सद्रूपं "तदैक्षत बहु स्यां प्रजायेय"[10] इति यत् जगत्कारणं ब्रह्म प्राक् प्रतिपादितं, तत् ब्रह्म त्वं श्वेतकेतुः जीवः असि इति जीवब्रह्मणोः ऐक्यं प्रतिपाद्यते। तत्रैव - "अतः स एव आत्मा जगतः प्रत्यक्स्वरूपं सतत्वं याथात्म्यम्। आत्मशब्दस्य निरुपपदस्य प्रत्यगात्मनि गवादिशब्दवन्निरूढत्वात्। अतः तत्वमसि इति हे श्वेतकेतो इत्येवं प्रत्यायितः"[11] इति आचार्यभाष्यम्।

"तत्वमसि" इत्यत्र एवं वाक्यार्थप्रक्रिया वेदान्तशास्त्रे क्रियते - "सोऽयं देवदत्तः" इति उदाहरणं स्वीकृत्य प्रक्रियां दर्शयन्ति। तत्र तत्पदेन तत्कालविशिष्टः देवदत्तः, इदं शब्देन एतत्कालविशिष्टः देवदत्तः उच्यते। तत्काल-एतत्कालविशेषणयोः परस्परं विरुद्धयोः देवत्तस्य अभेदग्रहार्थं भागत्यागलक्षणा आश्रियते। तेन तत्कालं एतत्कालं च परित्यज्य अविरुद्धं देवदत्तमात्रमाश्रियते। एवमेव तत्वमसि इत्यत्र तत्पदेन परोक्षत्वादिविषिष्टं चैतन्यं गृह्यते। केवलं श्रुत्यनुमानाभ्यां ग्राह्यत्वात् ईश्वरचैतन्यस्य परोक्षत्वम्। आदिपदेन सर्वज्ञत्व-सर्वनियन्तृत्वादिविशिष्टम् ईश्वरचैतन्यं ग्राह्यम्। त्वं पदेन तु अपरोक्षत्वादिविशिष्टं चैतन्यम् गृह्यते, गुरोः कृते श्वतकेतोः त्वंपदवाच्यस्य अपरोक्षेण दर्शनात् । आदिपदेन अल्पज्ञत्वादयः जीवधर्माः ग्राह्याः। एवं सति विरुद्धानां परोक्षत्वापरोक्षत्वादीनां परित्यागेन अविरुद्धस्य चैतन्यमात्रस्य ग्रहणं क्रियते। एवं भागत्यागलक्षणया आत्माभिन्नं ब्रह्म इति प्रतिपाद्यते[12]। एवमेव "प्रज्ञानं ब्रह्म"[13], "अहं ब्रह्मास्मि"[14],"अयमात्मा ब्रह्मा"[15] इति माहावाक्येषु जीवब्रह्मणोः ऐक्यं प्रतिपादितम्।

एवं परमात्मा एव जीवात्मनः स्वरूपम् इति निर्णयः। आत्मनः स्वरूपम् उपनिषदादिवेदान्तग्रन्थेषु ब्रह्म, परमात्मा, परा देवता, तुरीयम् इत्यादिपदैः व्यपदिश्यते। आत्मा हि ब्रह्म इति कारणात् आत्मस्वरुपस्य निर्णयार्थं ब्रह्मस्वरुपस्य प्रतिपादनम् औपनिषदं निरूप्यते।

<u>ब्रह्मस्वरुपचिन्तनद्वारा आत्मस्वरुपनिर्णयः</u>

---

[7] छां.उ ६/८/७

[8] छां.उ ६/१/३

[9] छां.उ ६/२/४

[10] छां.उ ६/२/३

[11] छां.भा ६/२/३

[12] वे.सा

[13] ऐ.उ ५/३

[14] बृ.उ १/४/१०

[15] मां.उ २

लक्षणं सजातीयभ्यः विजातीयेभ्यश्च लक्ष्यं व्यावर्तयति। उक्तं च – "समानजातीयेभ्यः निवर्तकानि विशेषणानि विशेष्यस्य, लक्षणं तु सर्वतः एव, यथा अवकाशदातृ आकशमिति"[16]। आकाशस्य अवकाशदातृत्वमिति लक्षणं सजीतीयेभ्यः पृथिव्यादिभूतेभ्यः विजातीयेभ्यः आत्मादिभ्यः तं वारयति।

लक्षणे पुनः द्वैविध्यं स्वरूपलक्षणं तटस्थलक्षणं चेऽति। स्वरूपमेव लक्षणं स्वरूपलक्षणम्[17]। तटस्थलक्षणं "यावल्लक्ष्यकालमनवस्थितत्वे सति यद्व्यावर्तकम्"[18]। यावत्कालं लक्ष्यं स्थितं भवति, न तावत् यदि तल्लक्षणं स्थितं भवति, तर्हि तत् तटस्थलक्षणम् इति उच्यते। यथा नैयायिकाभिमतं "गन्धवत्वं पृथिव्याः लक्षणम्"। उत्पन्नं द्रव्यं क्षणमगुणमक्रियाकं च तिष्ठति इति" इति न्यायानुसारं उत्पान्नायां च पृथिव्यां गन्धरूपीगुणः क्षणमेकं न तिष्ठति। किञ्च महाप्रलये सति पृथिवी-परमाणुश्चपि गन्धवत्वं न भवति। अतः गन्धवत्वं पृथिव्याः तटस्थलक्षणम्।

<u>ब्रह्मणः स्वरूपलक्षणम्</u>

ब्रह्मणः स्वरूपं च लक्षितम् – "सत्यं ज्ञानमनन्तं ब्रह्म"[19] इति। सत्यं ज्ञानम् अनन्तमिति शब्दाः न अन्योन्याश्रयाः। अतः ब्रह्मणः स्वातन्त्र्येण त्रीणि लक्षणानि भवन्ति। "सत्यं ब्रह्म", "ज्ञानं ब्रह्म", "अनन्तं ब्रह्म" इति। उक्तं च – "सत्यं ब्रह्म ज्ञानं ब्रह्म अनन्तं ब्रह्म"[20] इति। आनन्दमपि ब्रह्मणः स्वरूपमेव। उक्तं च – आनन्दो ब्रह्मेऽति व्यजानात्"[21] इति। अतः कुत्रचित् "सच्चिदानन्दत्वम्" ब्रह्मणः स्वरूपलक्षणम् उच्यते। यथा पञ्चदश्यां "इत्थं सच्चित्परानन्दः आत्मा"[22] इति। एतानि लक्षणानि ब्रह्मणः स्वरूपं प्रकाशयन्तः, आरात् तद्भिन्नेभ्यः व्यावर्तयन्ति। अतः सत्यादिलक्षणानि स्वरूपेण एव अर्थवन्ति भवन्ति।

तत्र "सत्यमिति यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति"[23] इत्युक्तं शाङ्करभाष्ये। अतः सर्वदा एकरूपं ब्रह्म इति प्राप्तम्। छान्दोग्ये अपि "सदेव सोम्य इदमग्र आसीत् एकमेवाद्वितीयम्"[24] इति उपदिष्टम् । इदं सर्वं नामरूपक्रियावद्विकृतं उपलभ्यते, तत्सर्वम् उत्पत्तेः प्राक् केवलं सद्रूपेण आसीत्। किञ्च इदानीमपि सद्रूपेण एव वर्तते, किन्तु नामरूपविशेषणवत् बुद्धिविषयं भवति इति विशेषः। उक्तं च – "इदानीमपि इदं सदेव किन्तु

---

[16] तै.भा १/१.

[17] वे.परि.विषयपरिच्छेदः

[18] वे.परि.विषयपरिच्छेदः

[19] तै.उ २/१/१

[20] तै.भा २/१/१

[21] तै.उ ३/६

[22] पं.दशी १/१०

[23] तै.भा २/१/१

[24] छां.उ ६/२/१

नामरूपविशेषणवत् इदंशब्दबुद्धविषयं च इतीदं च भवति"[25]। सृष्टौ ब्रह्मणः नामरूपविशेषः, रज्जौ सर्पबुद्धिवत् भ्रममात्रम्। अतः न याथार्थ्येण ब्रह्मणः विशेषः अस्ति। अतः सद्वस्तु स्वरूपं कदापि न व्यभिचरति। सत्यात् विपरीतम् अनृतं विकारम्। उक्तं च - "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" [26] इति। अतः यत् सत्यं तन्न विकारमिति प्राप्तम्। तस्मात् सर्वकारणं ब्रह्म इत्यपि प्राप्तम्। छान्दोग्यश्रुतौ "एकम् अद्वीतीयम्" इति च विशेषणे ब्रह्मणः सर्वकारणत्वम् दृढयतः। एकम् इति विशेषणेन सदितरं सर्वं तत्कार्यभूतम् इति प्राप्तम्। उक्तं च – "स्वकार्यपतितम् अन्यन्नास्तीति एकमेवेत्युच्यते" [27] इति। अद्वीतीयमिति न ब्रह्मभिन्नं कारणान्तरं किञ्चिदस्ति अस्य सकलस्य कार्यजातस्य इति लक्ष्यते। उक्तं च – तथा सद्व्यतिरेकेण सतः सहकारिकारणं द्वितीयं वस्त्वन्तरं प्राप्तं प्रतिषिध्यते अद्वितीयमिति"[28] इति। यदि ब्रह्मणः सकलकारणत्वमुच्यते तर्हि घटादीनां मृदादिकारणानि इव ब्रह्मणः सद्रूपत्वम् विहन्यते इति शङ्का न कार्या। यतः ब्रह्मणः सकलकारणत्वं च विविर्तोपादनत्वेमेव[29] न तु परिणाम्युपादनत्वम्।

सच्चिदानन्दं ब्रह्म स्वस्वरूपम् अपरित्यज्य सुखदुःखमोहात्मक-जगद्रूपेण मिथ्या प्रतिभासते। अथवा जगत्कारणस्य शुद्धस्य परमात्मनः पारमार्थिकसत्ता, तत्कार्यस्य जगतः व्यावहारिकसत्ता, इत्येवम् उपादानसत्तासमसत्ताकत्वशून्यत्वात् जगत् ब्रह्मणः विवर्तः, ब्रह्म जगतः विवर्तोपादानं कारणम्। उक्तं च - "जगदध्यासाधिष्ठानत्वं जगदाकारेण विपरिणममान-मायाऽधिष्ठानत्वं वा" [30] इति।
अतः एव घटादीनां मृदादिकारणवत्, ब्रह्मणः जगत्कारणत्वं न भवति। तस्मात् जगतः विविर्तोपादनकारणस्य अपि ब्रह्मणः सर्वविशेषप्रत्यस्तमितं सद्रूपत्वं न विहन्यते।

ज्ञानं ब्रह्म इति द्वीतीयलक्षणेन पुनः तदेव ब्रह्म लक्ष्यते। ज्ञानं ब्रह्म इत्यनेन ज्ञानकर्तृत्वं नेष्टम् , किन्तु अत्र भावार्थे ज्ञानशब्दः प्रयुक्तः। यदि ज्ञानकर्तृत्वम् ज्ञानं ब्रह्म इत्यनेन लक्षणेन इष्टं स्यात्, तर्हि सत्यं ब्रह्म लक्षणमेव नोपपद्येत। उक्तं च -"ज्ञानकर्तृत्वेन विक्रियमाणं कथं सत्यं भवेतदनन्तं वा"[31] इति। सत्यानन्तपदाभ्यां सह पाठात् ज्ञानमिति केवलं भावसाधनः शब्दः। अतः अवबोधस्वरूपं ब्रह्म। एतेन ब्रह्मणः कतृत्वादिकारकत्वं निवृत्तं भवति। किञ्च घटादीनां जडानां कारणं जडमेव मृत् दृष्टं लोके। एवमेव जडस्य अस्य प्रपञ्चस्य कारणं चेत् ब्रह्म जडमेव

---

[25] छां.भा ६/२/१

[26] छां.उ ६/१/३

[27] छां.भा ६/२/१

[28] छां.भा ६/२/१

[29] "सतत्वतो अन्यथा प्रथा विकार इत्युदारितः। अतत्वतोऽन्यथा प्रथा विवर्त इत्युदारितः"- वे.सा, "परिणामो नाम उपादानसमसत्ताककार्यापत्तिः, विवर्तो नाम उपादानविषमसत्ताककार्यापत्तिः" – वे.परि.प्रत्यक्षपरिच्छेदः

[30] वे.परि- विषयपरिच्छेदः

[31] तै.भा २/१/१

भवेत् इति आशङ्का अपि ज्ञानमिति लक्षणेन निवृत्तं भवति। एवं ज्ञानरूपस्य अपि ब्रह्मणः ज्ञानकर्तृत्वादिविकाराः न सन्ति इति सर्वविशेषराहित्यमेव वेदान्तिभिः प्रतिपाद्यते इति स्थितम्।

कुतश्चिदपि यत् न प्रविभक्तं तदनन्तम् ब्रह्म। उक्तं च "यद्धि न कुतश्चित् प्रविभज्यते तदनन्तम्"[32] इति। तस्मात् अपरिच्छन्नं ब्रह्म इति प्राप्तम्। परिच्छेदश्च कालतः देशतः वस्तुतश्च। देशान्तरे असत्वं क्वचित् देशे एव वा विद्यमानत्वं देशतः परिच्छिन्नत्वम्। एवमेव कालान्तरे असत्वं कालतः परिच्छिन्नत्वम्। वस्तुतः परिच्छिन्नत्वं केनचिदेव वस्तुना तादात्म्यापन्नत्वम्। उक्तं च –“तत्र देशतः परिच्छिन्नत्वम् अत्यन्ताभावप्रतियोगित्वम्। कालतः परिच्छिन्नत्वं ध्वंसप्रतियोगित्वम्। वस्तुतः परिच्छिन्नत्वम् अन्योन्याभावप्रतियोगित्वम्”[33] इति। एवं त्रिविधपरिच्छिन्नत्वमपि ब्रह्मणः नास्ति। अन्यत्रापि – “नित्यं विभुं सर्वगतं सुसूक्षमम् तदव्ययम्”[34] इति सर्वतः अपरिच्छिन्नं ब्रह्म एव श्रुतिः प्रतिपादयति। किञ्च अनन्तमिति विशेषणेन लोके च यत् ज्ञानं सान्तं दृष्टं ततः अपि निवृत्तिः सिध्यति। एवं सति सर्वतः अपरिच्छिन्नं निर्विकारं ब्रह्मणः स्वरूपमिति निर्णयः कार्यः।

ब्रह्म आनन्दस्वरुपम् । लोके च आनन्दः सातिशयः दृष्टः। ब्रह्म तु निरतिशयान्दस्वरूपम्। उक्तं च – “एतस्येव आनन्दस्य अन्यानि भूतानि मात्रामुपजीवन्ति” [35] इति। तैत्तिरियश्रुतौ मानुष-आनन्दात् शतगुणितक्रमेण प्रजापतेः आनन्दपर्यन्तम् उपदिश्य, प्रजापतेः आनन्दः अपि ब्रह्मान्दस्य एकदेशमात्रमिति उपदिश्यते[36]। “आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन”, “आनन्दो ब्रह्मेऽति व्यजानात्”[37] इत्यादिश्रुतिषु स्पष्टं ब्रह्मणः आनन्दस्वरूपत्वम् उपदिश्यते।

पञ्चदश्यामपि – “इयमात्मा परानन्दः परप्रेमास्पदं यतः।

मान भूवं हि भूयासं इति प्रेमात्मनीक्ष्यते॥”[38] इति आत्मनः आनन्दस्वरुपत्वादेव सर्वेषां जीविनां स्वात्मनि प्रेम लक्ष्यते इति प्रतिपादितम्। एवं ब्रह्मणः लौकिकानन्दवत् न क्षणिकानन्दत्वं, किन्तु निरतिशयानन्दस्वरूत्वमित्यतः, तत् ब्रह्म निर्विकारः एव इति पुनरपि प्रतिपादितं भवति।

अत्र इदम् अवगन्तव्यम्। सत्यादिशब्दैः ब्रह्मणः स्वरूपं निर्दिष्टम्। किन्तु सर्वविकारप्रत्यस्तमितं ब्रह्म न केनापि शब्देन इदंतया निर्दिष्टुं शक्यते। ब्रह्म, अक्षरम्, आत्मा, परा देवता इत्यादिशब्दाः अपि ब्रह्मणः स्वरूपं

---

[32] तै.भा २/१

[33] अ.सिद्धिः १/परिच्छिन्नत्वहेतूत्पत्तिः

[34] मुं.उ १/१/६

[35] बृ.उ ४/३/३२

[36] स एको मानुष आनन्दः। ते ये शतं मानषा आनन्दाः।...स एको ब्रह्मणः आनन्दः” (तै.उ २/८/१-४), “यस्य परमानदस्य मात्रैकदेशः”( तै.भा २/८/४)

[37] तै.उ २/९/१, तै.उ ३/६/१

[38] पं.दशी १/८

कदापि न निर्दिशन्ति। प्राक् प्रतिपादितानि सत्यज्ञानानन्तानन्दादिशब्दाः अपि ब्रह्म न निर्दिशन्ति। अत एव उक्तम् आचार्यैः "एवं सत्यादिशब्दाः इतरेतरसन्निधौ अन्योन्यनियम्यनियामकाः सन्तः सत्यादिशब्दवाच्यात् तन्निवर्तकाः ब्रह्मणः लक्षणार्थाश्च भवन्ति"[39] इति। अर्थात् सत्यादिविशेषणैः ब्रह्म केवलं लक्ष्यते, न तु उच्यते।

तर्हि कथं वा तस्य परमात्मनः स्वरूपनिर्देशः कर्तुं शक्यः इति प्रश्ने उपनिषदाम् उत्तरम् - "अथ आदेशो नेऽति नेऽति"[40] इति।

अन्यत्रापि –"तत्वमस्यादिवाक्येन स्वात्मा हि प्रतिपादितः।

नेऽति नेऽति श्रुतिर्ब्रूयात् अनृतं पाञ्चभौतिकम्॥"[41] इति।

सर्वेषां विशेषानां निराकरणपूर्वकमेव परमात्मनः निद्रेशः कर्तुं शक्यः। न कदापि इदंतया, केनापि शब्दविशेषेन परमात्मनः निर्देशः कर्तुम् शकयते। उपनिषत्सु ,अन्यत्र कुत्रापि वेदान्तशास्त्रे निर्विशेषस्य ब्रह्मणः ब्रह्मादिपदैः, सत्यादिलक्षणैः वा निर्देशः, नामरूपयोः अध्यारोपेण एव कृतः इति अवगन्तव्यम्। आचार्याः अपि बृहदारण्यकभाष्ये तदेव स्पष्टयन्ति[42]। अत एव- "यत्तदद्रेश्यम् अग्राह्यमगोत्रमवर्णम् अचक्षुश्रोत्रं तदापणिपादम्", "अस्थूलमनण्वह्रस्वमदीर्घम्..."[43] इत्यादिवाक्यैः नेऽति नेऽति क्रमेणैव ब्रह्मणः निर्देशः कृतः।

यदि सर्वविशेषप्रत्यस्तमितं ब्रह्म तर्हि तस्य अस्तित्वं कथं इति आकाङ्क्षा भवति। यतः लोके अस्तीति व्यपदिष्टं वस्तु नामवत् रूपवत् वा भवति। किन्तु ब्रह्म तु नामरूपरहितमिति लौकिकवस्तूनाम् अस्तित्वमिव तस्य अस्तिता नैव भवितुमर्हति। किन्तु उपनिषत् "असन्नेव स भवति। असत् ब्रह्मेऽति वेद चेत्। अस्ति ब्रह्मेऽति चेद्वेद। सन्तमेनं ततो विदुरिति"[44] इति अस्तित्वलक्षणं ब्रह्म एव प्रतिपादयति। अतः ब्रह्मणः अस्तित्वम् अनुभवमात्रगम्यत्वेमेव इति अङ्गीकरणियं भवति। ब्रह्मानुभवश्च ज्ञानिनामस्तीति स्वयं श्रुतिः प्रतिपादयति - "नित्यं विभुं सर्वगतं सुसूक्ष्मम् तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः" [45] इति।

---

39 तै.भा २/१

40 बृ.उ २/६

41 अवधूतगीता १/२५

42 - "सर्वोपाधिविशेषापोहेन यस्मिन्न कश्चिद्विशेषोऽस्ति नाम वा रूपं वा कर्म वा भेदो वा जातिर्वा गुणो वा तदद्वारेण हि शब्दप्रवित्तिर्भवति। न चैषां कश्चिद्विशेषो ब्रह्मण्यस्ति। अतो न निर्दुष्टं शक्यते इदं तदिति। अध्यारोपितनामरूपकर्मद्वारेण ब्रह्म निर्दिश्यते "विज्ञानमानन्दं ब्रह्म' विज्ञानघनः एव" "ब्रह्मात्मेत्येवामादिशब्दैः। यदा पुनः स्वरूपमेव निर्दिदिक्षितं भवति निरस्तसर्वोपाधिविशेषं तदा न शक्यते केनचिदपि प्रकारेण निर्देष्टुम्। तदा अयमेवान्भ्युपायो यदुत प्राप्तनिर्देशप्रतिषेधद्वारेण नेऽति नेऽति इति निर्देशः " – (बृ.भा २/६)

43 मुं.उ १/६, बृ ३/८/८

44 तै.उ २/६/१

45 मुं.उ १/६

एवं जीवब्रह्मणोः तादात्म्यकारणात् यदेव ब्रह्मणः स्वरूपं तदेव जीवस्य इति कारणात्, आत्मा स्वरुपेण सर्वविशेषरहितः इत्येव प्रतिपादनीयम्। अतः जीविनाम् अनुभवे वर्तमानाः जन्मादिषड्भावविकाराः, न ते स्वरूपतः आत्मनः सन्ति। उक्तं च – "न जायते म्रियते वा विपश्चित्",

"न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।

अजो नित्यः शाश्वतोऽयं पुराणो नन् हन्यते हन्यमाने शरीरे॥"

"अस्मिन् मन्त्रे षड्भावविकाराः लौकिकवस्तुविक्रियाः आत्मनि प्रतिषिध्यन्ते। सर्वप्रकारविक्रियारहितः आत्मा"[46] इति च।

अत एव स्वरुपतः कतृत्व-भोकृत्वादयः संसारधर्माः अपि आत्मनः न सन्ति। उक्तं च – "विद्ध्यकर्तारमव्ययम्", "न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा", "एषाम् कर्मणां कर्तारं मां मन्यसे परमार्थतः तेषाम् अकर्ता एव अहम्"[47] इत्यादिरुपेण।

किञ्च - "अकर्ताहमभोक्ताहं अविकारोऽहमविक्रियः।

शुद्धबोधस्वरुपोहं केवलोऽहं सदाशिवः॥",

"अकर्ता अपि कर्ता इव, अभोक्ता अपि भोक्ता इव"[48] इत्यादिशास्त्रवाक्यानि अपि अस्मिन् विषये प्रमाणानि भवन्ति।

निर्विकारस्य आत्मनः अविद्याध्यासमात्रं सांसारिकत्वम्

शुद्धस्य सर्वविकारवर्जितस्य आत्मनः सांसारे व्यवाहारः अध्यासकारणात् भवति। शुक्तौ रजतं यथा अध्यस्तं तथैव जगदिदं ब्रह्मणि अध्यस्तम्। अस्य जगदध्यासस्य अधिष्ठानत्वेन ब्रह्म जगतः विवर्तोपादनम् इति प्राक् प्रतिपादितम्। "एकमेवाद्वितीयम्" इति ब्रह्मणः एकत्व-अद्वितीयत्वोपदेशबलेन दृश्यमानस्य नानात्वस्य प्रपञ्चस्य अध्यस्तत्वम् अवश्यम् अङ्गीकरणीयम्। यथा प्रातिभासिकं रजतं अनिर्वचनीयम् अविद्यमात्रं व्यावहारिकसत्ताके शुक्तौ अध्यस्यते, एवमेव व्यावहारिकसत्ताकः देहेन्द्रियादि-सकलप्रपञ्चः पारमार्थिकब्रह्मवस्तु-अपेक्षया अविद्यामात्ररूपः पारमार्थिकसद्रूपे चिदात्मानि ब्रह्मणि अध्यस्यते। "पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः सकलः इति बाह्यधर्माणाम् आत्मनि अध्यासः, स्थूलोहं कृशोहम् इति देहधर्माणाम् अत्मनि अध्यासः, मूकः काणः इति इन्द्रियधर्माणामध्यासः, कामःसङ्कल्पादीनाम् अन्तःकरणधर्माणाम् आत्मनि अध्यासः अज्ञानवशात् मिथ्या एव सम्भवति"[49]। भामत्यां च उक्तं - "एवं च देहेन्द्रियादिप्रपञ्चोऽपि अनिर्वाच्यः,

---

[46] क.उ १/२/१८, भ.गी २/२०, गी.भा २/२०

[47] भ.गी४/१३, भ.गी ४/१४, गी.भा ४/१४

[48] वि.चू.म.४९१, भामती ब्र.सू.उपोद्घातभष्यम्

[49] अ.भा

अपूर्वोऽपि पूर्वमिथ्याप्रत्योयोपदर्शितः इव परत्र चिदात्मनि अध्यस्यते इति उपपन्नम्"[50] इति। अन्यत्रापि - "षोडशकलाभिः उपाधिभूताभिः सकलः इव निष्कलः पुरुषः लक्ष्यते"[51] इति।

शुक्तौ रजतभ्रमस्य शुक्तित्वप्रकारिका अविद्या यथा कारणं तथैव आत्मनि आनात्मनः अध्यासस्यापि अविद्या एव कारणम्। उक्तं च – "स च अविद्या सर्वस्य अनर्थस्य प्रसवबीजम्" "अविद्यावत्वेन जीवस्य सर्वः संव्यवहारः सन्ततो वर्तते", "अविद्यावेशवशात् देहाद्यात्मभावमिव गत्वा, तत्कृतेन दुःखेन दुःखी अहम् इति अविद्यया कृतं दुःखोपभोगम् अभिमन्यते", "तमेतं अविद्याख्यम् आत्मानात्मनोः इतरेतराध्यासं पुरस्कृत्य सर्वे प्रमाण-प्रमेयव्यवहाराः लौकिकाः वैदिकाश्च प्रवृत्ताः"[52]।

किञ्च यथा शुक्तौ रजताध्यासेण शुक्तिः परमार्थतः न सम्बध्यते, एवमेव देहेन्द्रियादिप्रपञ्चस्य अध्यासेण न असङ्गं ब्रह्म सम्बध्यते। उक्तं च - "यत्र यदध्यासः तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि न सम्बध्यते"[53]इति। यथा प्रातिभासिकं रजतं स्व-अधिष्ठानभूतशुक्तिज्ञानेन, स्व-उपादानेन शुक्तिप्रकारक-अज्ञानेन सह बाध्यते, एवमेव सकलः देहेन्द्रियादिप्रपञ्चः ब्रह्मणः अधिष्ठानस्य ज्ञानेन स्वोपादानभूत-अज्ञानसहितः बाध्यते।

यदि अध्यासः मिथ्यारूपः तर्हि उपनिषत्सु, यथोर्णनाभिः[54] इत्यादिरूपेण जगत्कारणत्वेन, "षोडशकलः पुरुषः"[55] इति वा, "भीषास्माद्वातः पवते"[56] इति सर्वस्वामित्वेन रूपेण वा निर्विकारस्य परमात्मनः वर्णनं कुतः क्रियते इति प्रश्नः भवति। प्रागुक्तरीत्या ब्रह्माभिन्नात्मनः केवलं नेऽति नेऽति क्रमेणैव स्वरूपं अवगन्तुं शक्यम् इत्यतः शास्त्राणि निर्विकारे ब्रह्मणि नानाविशेषान् अध्यस्य ततः नेऽति नेऽति उपदेशेण परमात्मनः स्वरूपं दर्शयितुं इच्छन्ति इति अवगन्तव्यम्[57]।

<u>आत्मनः सर्वविशेषप्रत्यस्तमितस्वरूपे योगाशास्त्रस्य सम्मतिः</u>-

योगशास्त्रे जीवः पुरुषशब्देन व्यपदिश्यते। उपनिषत्सु गीतायां च जीवस्य पुरुषशब्दप्रयोगः तत्र तत्र श्रूयते। यथा - "एषः हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता। विज्ञानात्मा पुरुषः", "पुरुषः

---

[50] भामती.अ.भा

[51] प्र.भा ६/१

[52] बृ.भा ३/५/१, सू.भा १/४/३, सू.भा २/३/४६, अ.भा

[53] अ.भा.

[54]. मुं.उ २/१/२०.

[55]. प्र.उ ६/२.

[56]. तै.उ २/९/१.

[57]."अविद्ययेति तदुपाधिकलाध्यारोपापनयेन विद्यया स पुरुषः केवलो दर्शयितव्य इति कलानां तत्प्रभवत्वमुच्यते प्राणादीनाम्, अत्यन्तनिर्विशेषे ह्यद्वये शुद्धे तत्वे न शक्यो अध्यारोपमन्तरेण प्रतिपाद्यप्रतिमादनादिव्यवहारः कर्तुम्" – प्र.भा ६/१.

कार्यकरणसङ्घातोक्तोपाधिपूर्णत्वात् पुरुषः", "स एतमेव पुरुषम् ब्रह्म ततमपैश्यत्", "पुरि शयानम् आत्मानं ब्रह्म "[58] इत्येवमादिषु।

वेदान्तशास्त्रे यथा सर्वविशेषरहितं आत्मनः स्वरूपमिति निर्णयः कृतः एवमेव योगशास्त्रे अपि पुरुषस्य आत्मनः सर्वविकारहितं शुद्धं स्वरूपमेव प्रतिपाद्यते। पुरुषस्य देहेन्द्रियादिसकलः व्यवहारः बुद्धिगतः एव, न स्वतः पुरुषस्य दृश्यप्रपञ्चे व्यवहारः सम्भवति इति योगिनः निरूपयन्ति। उक्तं च - "द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः"[59] इति। सकलवृत्तिनिरोधरूपे समाधौ योगशब्दिते पुरुषः स्वस्वरूपे तिष्ठति, यथा कैवल्ये इति योगिनः वदन्ति। उक्तं च – "तदा द्रष्टुः स्वरूपे अवस्थानम्"[60], "स्वरूपप्रतिष्ठा तदा चितिशक्तिः यथा कैवल्ये"[61] इति। तेन च पुरुषः स्वरूपेण सर्वसंसारधर्मवर्जितः इति प्राप्तम् भवति। समाधिभिन्नकाले तु बुद्धिवृत्तिसारूप्यं पुरुषस्य। उक्तं च - "वृत्तिसारूप्यमितरत्र" [62] इति। पुरुषः स्वरूपतः शुद्धोऽपि बुद्धेः प्रतिसंवेदी। अतः उच्यते सः बुद्धेः न सरूपः न अत्यन्तं विरूपश्च। सत्वरजस्तमोगुणात्मिका बुद्धिः परिणामिनी, पुरुषः अपरिणामी। जडा बुद्धिः परार्था, पुरुषस्तु चेतनः स्वार्थः इति। उक्तं च- "परार्था हि बुद्धिः संहत्यकारित्वात्, स्वार्थः पुरुषः", "अपरिणामिनी हि भोक्तृशक्तिः अप्रतिसंक्रामा च परिणामिन्यर्थे प्रतिसंक्रान्ता इव तद्वृत्तिमनुपतति"[63] इति।

अत्रायं भेदः – वेदान्तिनः योगिनश्च पुरुषस्य स्वरूपेण निर्विकारत्वमङ्गीकुर्वन्ति इति अवगतम्। किन्तु योगिनः वेदान्तिनः इव जीवात्मपरमात्मनोः अभेदं न अङ्गीकुर्वन्ति। वेदान्तिभिः यथा तुरीयं शुद्धचैतन्यमङ्गीकृतं, तथैव योगिभिः ईश्वरः अङ्गीक्रियते। उक्तं च- "क्लेशकर्मविपाकाशयैः अपरामृष्टः पुरुषविशेषः ईश्वरः"[64] इति। क्लेशाः अविद्यादयः[65]। कर्माणि शुभाशुभरूपाणि। विपाकः कर्मणां फलं सुखदुःखरूपम्। आशयः सुखदुःखभोगेन जायमानाः वासनाः। एतेभ्यः सर्वेभ्यः सर्वदा सर्वथा ईश्वरः न सज्जते। अर्थात् ईश्वरः नित्यमुक्तः। उक्तं च – "स तु सदैव मुक्तः, सदैव ईश्वरः"[66] इति। किन्तु सः ईश्वरः जीवात्मनः भिन्नः, अतः पुरुषविशेषः। यतः जीवः मुक्तेः प्राक् अविद्यादिभिः क्लेशैः क्लिश्नाति, किन्तु न कदापि ईश्वरः बन्धकोटौ पतति[67]। उक्तं च – "यथा मुक्तस्य पूर्वा बन्धकोटिः प्रज्ञायते नैवमीश्वरस्य"[68] इति। । अतः यथा वेदान्तिभिः सर्व-उपाधिभिः प्रत्यस्तमितं ब्रह्मचैतन्यं

---

58 प्र.उ ४/९, प्र.भा ४/९. ऐ उ २/१३, ऐ.भा २/१३

59 यो.सू २/२०.

60 यो.सू १/३

61 व्यासभाष्यम् १/३

62 यो.सू १/४

63 व्यासभाष्यम् ३/२०

64 यो.सू १/१४

65 अविद्यास्मितरागद्वेषाभिनिवेशाः क्लेशाः-यो.सू १/२/३

66 व्यासभाष्यम् १/२४

67 " ईश्वरस्य च तत्समन्धः न भूतो न भावी" - व्यासभाष्यम् १/१४

68 व्यासभाष्यम् १/२४

नित्यमुक्तमङ्गीक्रियते, तथैव नित्यमुक्तः ईश्वरः योगिभिरपि अनुमन्यते चेदपि तस्य स्वरूपतः जीवाभिन्नत्वं नाङ्गीक्रियते।

किन्तु जीवस्य स्वरूपेण सर्वक्लेशराहित्यं प्रतिपादयद्भिः योगिभिः ईश्वराभेदनिराकरणे न किञ्चित् कारणं लक्षितुं शक्यते। किञ्च तत्वमस्यादिशास्त्रेभ्यः कण्ठतः जीवब्रह्मणोः ऐक्ये प्रतिपादिते सति ,तन्निकारणे अपि योगिनां नास्ति किञ्चित् प्रमाणान्तरम्। एक एव आकाशः घटेन मठेन वा अवच्छिन्नः घाटाकाशः मठाकाशः उच्यते, एवमेव विविधैः शरीरेन्द्रियादिसङ्घातैः अवच्छिन्नम् एकमेव चैतन्यं विविधजीवभेदवत् भवति। यदा घटादि-उपाधयः नष्टाः भवन्ति तदा घटाकाशः मठाकाशः इति भेदो न भवति, किन्तु सर्वमपि महाकाशमेव भवति। एवमेव शरीरादिभ्यः उपाधिभ्यः अनवच्छिन्नं चैतन्यम् एकमेवाद्वितीयम् ब्रह्म एव इति वक्तव्यं भवति। किञ्च घटमठादि-उपादिभ्यः अवच्छिन्नाकाशातिरिक्तः महाकाशः भवत्येव,एवमेव सर्वदा सर्वैः उपाधिभिः अनवच्छिन्नं नित्यमुक्तं ब्रह्मवस्तु अस्त्येव। अनेन अभिप्रायेण ईश्वरस्य नित्यमुक्तत्वं पुरुषविशेषः इति व्यपदेशः योगमते सम्भवति। किन्तु मुक्तोऽपि पुरुषः ईश्वारात् भिन्नः इति योगिनां वादः अप्रामाणिकः श्रुति-न्यायविरुद्धश्च।

<u>योगमतानुसारम् आत्मनि अनात्मनः अध्यासे अविद्यायाः कारणत्वम्</u>–

सर्वविशेषरहितेण पुरुषेण सह तद्भोगार्थं, तस्य अपवर्गार्थं च बुद्धिः संयुक्ता भवति इति योगिनां वादः। उक्तं च - "तदर्थः एव दृश्यस्य आत्मा"[69] इति।

तर्हि शुद्धस्य चैतन्यस्य पुरुषस्य, अशुद्धस्य जडरूपस्य बुद्ध्यादिप्रपञ्जस्य च संयोगकारणं किमिति आकाङ्क्षायां वेदान्तसम्मतमेव अविद्यां तत्कारणं वदन्ति योगिनः। उक्तं च - "तस्य हेतुरविद्या"[70] इति।

अविद्या च विपर्ययः अतस्मिन् तद्बुद्धिरूपा, विद्याविरोधिनी[71], सर्वक्लेशमूला वेदान्तसम्मता एव योगिभिः अङ्गिक्रियते। अविद्यास्वरूपं वर्ण्यते योगशास्त्रे- "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या"[72]। अनित्ये घटादौ नित्यत्वाभिमानः। अशुचौ कायादौ शुचित्वप्रत्ययः[73]। दुःखे स्रक्चन्दनवनितादौ सुखत्वारोपः[74]। अनात्मनि देहादौ आत्मत्वबिद्धिः। उक्तं च – "अनात्मनि च देहादावत्मत्वबुद्धिस्तु देहिनाम्।

अविद्या तत्कृतो बन्धस्तन्नाशो मोक्ष उच्यते॥[75]

---

[69] यो.सू २/२१

[70] यो.सू २/२४.

[71] "अविद्या मूलमस्य क्लेशसंतानस्य...।...किन्तु विद्याविपरीतं ज्ञानान्तरमविद्या" - व्यासभाष्यम् २/५

[72] यो.सू २/५

[73] कायाद्बीजादुपष्टम्भात् निष्यन्दान्निधनादपि।

कायमाधेयशौचत्वात्पण्डिता ह्यशुचिं विदुः॥– सर्वदर्शनसङ्ग्रहः १५/३००

[74] "परिणामतापसंस्कारदुःखैः गुणवृत्यविरोधाच्च दुःखमेव सर्वं विवेकिनः"-यो.सू २/१५ इति अयोगिनां सुखमपि योगिनः दुःखरूपमिति प्रतिपादितम्। अतः स्रक्चन्दनादीनि सुखरूपाणि इति अविद्यामात्र हि तत्।

[75] सर्वदर्शनसङ्ग्रहः १५/३०१

तस्मात् पुरुषः स्वरूपतः सकलवृत्तिरहितः शुद्धः चैतन्यरूपः एव। उक्तं च -"व्युत्थाने याश्चित्तवृत्तयः तदवशिष्टचित्तवृत्तिः पुरुषः"[76] इति। अविद्यावशादेव आत्मनि अनात्मानः देहादयः अरोपिताः इति हेतोः देहेन्द्रियादिव्यतिरिक्तः एव आत्मा इत्यपि सिद्धं भवति। तस्मात् वेदान्तसम्मतमेव आत्मनः सर्वसंसारधर्मवर्जितं देहेन्द्रियादिव्यतिरिक्तं शुद्धं स्वरूपं योगिभिरपि प्रतिपाद्यते इति स्पष्टम्।

अत्रायं भेदः – वेदान्तिनः योऽयं देहेन्द्रियादिप्रपञ्चः आत्मनि अध्यस्यते तस्य मिथ्यात्वं प्रतिपादयन्ति। किन्तु योगिनः प्रपपञ्चस्य मिथ्यात्वं न वदन्ति। किन्तु अविद्यावशात् अस्य प्रपञ्चस्य सत्यस्य एव आत्मनि अध्यासमात्रं वदन्ति। प्रकृतिपुरुषयोः विवेकज्ञानेन तयोः संयोगकारणम् अविद्या नष्टं भवति। ततः आत्मा स्वस्वरूपे अवतिष्ठते इति योगिनां वादः। उक्तं च – "तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यम्"[77] इति। व्यासभाष्ये च - "तस्य अदर्शनात् अभावात् बुद्धिपुरुषसंयोगाभावः।...तदा स्वरूपप्रतिष्ठः पुरुषः"[78] इति प्रतिपादितम्।

किन्तु एकमेवाद्वितीयादिश्रुतीनां प्रामाण्यं तदैव रक्षितं भवति, यदा ब्रह्मणि अध्यस्तस्य प्रपञ्चस्य मिथ्यात्वमुच्यते। अतः श्रुतिविरोधात् प्रपञ्चमित्यात्वम् अवश्यमङ्गीकरणीयम्।

<u>आयुर्वेदे अपि आत्मनः सर्वविकारराहित्याभ्युपगमः</u>

आयुर्वेदशास्त्रं न आत्मदर्शनाय विशिष्टं, किन्तु देहेन्द्रियादीनां चिकित्सार्थं प्रणीतं शास्रं तथापि रोगाणाम् आश्रयः कः इति आकांक्षायाम् आत्मनः स्वरूपविचारः अत्र दृश्यते। तदनुसारम् आत्मा निर्विकारी, अतः स न कदापि रोगाश्रयः भवितुमर्हति इति प्रतिपाद्यते। किञ्च देहेन्द्रियादिभ्यः परः आत्मा, तेषां सङ्घाते चैतन्याभिव्यक्तौ कारणमतः, चैतन्यरूपम्। स न कदापि आन्तरैः बाह्यैः वा विषयैः अभिलिप्यते, किन्तु नित्यः सः आत्मा साक्षिरूपेण द्रष्टा केवलं भवति। साक्षी च अन्तःकरण-उपहितं चैतन्यम्। अर्थात् अन्तःकरणस्य धर्माः न चैतन्ये अनुवर्तन्ते। उक्तं च – "तत्साक्षी तु अन्तःकरणोपहितं चैनन्यम्।...उपाधिश्च कार्य-अनन्वयी व्यावर्तकः"[79] इति। अतः सर्वविशेषप्रत्यस्तमितम् आत्मनः स्वरूपम् अयुर्वेदविदः अपि इच्छन्ति।

उक्तं च – "निर्विकारः परस्त्वात्मा सत्वभूतगुणेन्द्रियैः।

चैतन्ये कारणं नित्यो द्रष्टा पश्यति हि क्रिया॥"[80] इति।

एवं वेदान्तप्रतिपादितरीत्या निर्विकारं शुद्धमेव आत्मनः स्वरूपम् आयुर्वेदविद्भिः अपि इष्टम् इति स्थितम्।

<u>उपसंहारः</u>

---

[76] व्यासभाष्यम् १/४

[77] तदभावत् इति अविद्याभावः उच्यते। पूर्वस्मिन् सूत्रे "तस्य हेतुरविद्या"(यो.सू २/२४) इति अविद्यायाः प्रकृतिपुरुषसंयोगहेतुत्वं प्रतिपादितम्।

[78] व्यासभाष्यम् २/२५.

[79] वे.परि.प्रत्यक्षपरिच्छेदः

[80] चरकसंहिता, सूत्रस्थानम् १/५६

वेदान्तशास्त्रे योगायुर्वेदशास्त्रयोः च प्रातिपाद्यविषये भेदः अस्ति। अपि च सृष्टिक्रमः, प्रपञ्चसत्यत्वमिथ्यात्वविषयः, जीवेश्वरयोः भेदाभेदविचारः, प्रपञ्चकारणम् ईश्वरो वा प्रधानं वा, इत्येवं बहुषु विषयेषु एषु शास्त्रेषु मतभेदः अपि दृश्यते। किन्तु आत्मनः स्वरूपविचारे त्रिष्वपि शास्त्रेषु सहमतिः अस्ति इति लक्ष्यते। श्रुतिबलात्, युक्तिभ्यः, मुक्तानाम् अनुभावाच्च वेदान्तिभिः आत्मा स्वरूपेण सर्वविकारप्रत्यस्तमितः इति प्रतिपाद्यते। तस्मिन् विषये प्राक् प्रदर्शितरीत्या योगायुर्वेदशास्त्रयोः अपि सहमतिः वर्तते इति अवगन्तुं शक्यते। तस्मात् आत्मा सर्वविकाररहितः एकरसः नित्यशुद्धबुद्धमुक्तस्वरूपः इति वेदान्तमतमेव साधु।

संक्षेपाक्षरसूची

1. तै.उ- तैत्तिरियोपनिषत्.
2. प्र.उ – प्रश्नोपनिषत्.
3. मुं.उ- मुण्डकोपनिषत्.
4. मां.उ – माण्डुक्योपनिषत्.
5. ऐ.उ- ऐतरेयोपनिषत्.
6. छां.भा- छान्दोग्यभाष्यम्.
7. बृ.भा- बृहदारण्यकोपनिषत्.
8. तै.भा – तैत्तिरियोपनिषदः शाङ्करभाष्यम्.
9. प्र.भा – प्रश्नोपनिषदः शाङ्करभाष्यम्.
10. मुं.उ- मुण्डकोपनिषदः शाङ्करभाष्यम्.
11. मां.भा- माण्डुक्योपनिषदः शाङ्करभाष्यम्.
12. ऐ.भा- ऐतरेयोपनिषदः शाङ्करभाष्यम्.
13. छां.भा- छान्दोग्योपनिषदः शाङ्करभाष्यम्.
14. अ.भा – अध्यासभाष्यम्.
15. सू.भा- ब्रह्मसूत्र-शाङ्करभाष्यम्.
16. अ.सि- अद्वैतसिद्धिः.
17. वे.सा- वेदान्तसारः.
18. वे.परि- वेदान्तपरिभाषा.
19. पं.दशी- पञ्चदशी.
20. वि.चू.म- विवेकचूडामणिः.
21. यो.सू- योगसुत्रम्.
22. व्यासभाष्यम्- योगसूत्र-व्यासभाष्यम्.
23. आचार्यः- शङ्कराचार्यः.

ग्रन्थसूची

उपनिषद्भाष्यम् (खण्ड १,२,३)

श्री मणिद्रविड सम्पादितम् / अद्वैतग्रन्थरत्नमञ्जूषा २ / *प्रकाशनम्* - महेश अनुसन्धान संस्थानम्(श्री दक्षिणामूर्तिमठ प्रकाशन), वाराणसी / द्वितीयं संस्करणम्।

श्रीमद्भगवद्गीता (शाङ्करभाष्य-अष्टटीकाभ्यः उपेता)

श्री वासुदेवशर्मणा संस्कृतम् / व्रजजीवन प्राच्यभारती ग्रन्थमाला ६४ / *प्रकाशनम्* - चौकम्बा संस्कृत प्रतिष्ठान, दिल्ली / पुनर्मुद्रित संस्करण २०१६

ब्रह्मसूत्रशांकरभाष्यम्(भाष्यरत्नप्रभा-भामती-न्यायनिर्ण-व्याख्योपेता)

श्री अचार्यजगदीशशास्त्रिणा सम्पादितम् / *प्रकाशनम्* - मोतिलाल बनारसीदास,दिल्ली / प्रथम मुद्रण - १९८० , पुनर्मुद्रण – २००५।

अद्वैतसिद्धिः (बालबोधिनी व्याख्योपेता, प्रथमो भागः)

शेखरदेवशर्मणा सम्पादितम् / प्राच्यभारती ग्रन्थमाला – १२ / *प्रकाशनम्* - रत्ना पब्लिकेशन्, वाराणसी / द्वितीयं मुद्रणम् २००७।

सर्वदर्शनसङ्ग्रहः

श्री टि.जि मायांकर् सम्पादितम् / राजकीया प्राच्यग्रन्थश्रेणिः - “ए” १ / *प्रकाशनम्* - भण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्, पुणे,१९७८ / तृतीयं मुद्रणम्।

पञ्चदशी

वासुदेवशर्मणा संस्कृतम् / हरिदास संस्कृत ग्रन्थमाला – ३२८ / *प्रकाशनम्* - संस्कृत सीरिज आफीस, वाराणसी / संस्करणम् – २००९।

चरक संहिता

डा॥ यादव जी त्रिकम जी आचार्य सम्पादित / काशी संस्कृत ग्रन्थमाला -१९४ / *प्रकाशनम्* - चौकम्बा संस्कृत संस्थान, वाराणसी / संस्करण - पुनर्मुद्रित,वि.सं. २०७३।

सुश्रुतसंहिता

काशी संस्कृत ग्रन्थमाला -१५६ / *प्रकाशन* - चौकम्बा संस्कृत संस्थान, वाराणसी / संस्करण - पुनर्मुद्रण, वि.सं. २०७५।

पातञ्जलयोगदर्शनम् (व्यासभाष्यसहितम्)

काशी संस्कृतग्रन्थमाला – २०१ / *प्रकाशन* - चौकम्भा प्रकाशन, वाराणसी / संस्करण - पुनर्मुद्रित, वि.स २०७४